राजन्नुलूकमिदमब्रवीत् । उलूक! गच्छ कैतव्य! पाण्डवान् सहसोमकान्” इत्यादिना भा० उ० ५०।अ० । उलूकस्य कैतव्यः कितवस्यापत्यम् । तदागमनमधिकृत्यैव उलूकदूतगमनपर्व्व उद्योगपर्वान्तर्गतं पर्व्व ।४ देशभेदे । “उलूकवासिनं राजन् बृहन्तमुपजग्मिवान्” । “उलूकानुत्तरांश्चैव तांश्च राज्ञः समानयत्” भा० स०अ० । अयञ्च देशः “प्रययावुत्तरां तस्माद्दिशं धनदपालिताम्” इत्युपक्रम्य तस्य कीर्त्तनात् धनञ्जयस्य उत्तरदिग्विजय एव तस्य उलूकदेशस्य वर्णनाच्च उत्तरदेशवर्त्तीति गम्यते । ५ तद्देशनृपे च “उत्तरं पर्वतोद्देशं ये ते दुर्गसहा नृपाः । आरोहन्तु विमर्द्दन्तो वज्रप्रतिमगौरवाः । उलूकः कैतवेयश्च” हरिवं० ९९ ।

**उलूकयातु** पु० उलूकरूपेण याति या—तुन् । असुरभेदे । “उलूकयातुं शुशुलूकयातुं जहि” ऋ० ७,१०४,१२ । “उलूकरूपेण यातमुलूकयातुम्” भा० ।

**उलूखल** न० ऊर्द्ध्वं खम् उलूखं पृषो० तत् लाति गृह्णाति ला—क । धान्यादिकण्डनसाधने काष्ठमये १ पात्रे (उखरो) तच्च यज्ञियपात्रभेदः । तल्लक्षणमुक्तम् “उलूखलमुषले अरत्निमात्रे औदुम्बरे प्रादेशमात्रे चतुरस्रमुलूखलं मध्यसंगृहीतमूर्द्ध्वं वृत्तम्, मुषलं दक्षिणमुलूखलात्” कात्या० १७,५,२ । तदुत्तरत्र सूत्रेऽपि उदा० । “वनस्पतिभ्य इत्येव मुषलोलूखले हरेत्” मनुः “स्फ्यशूर्पशकटानाञ्च मुषलोलूखलस्य च । अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम्” तस्य मनूक्ता शौचं ज्ञेयम् उलूखलशब्दस्य यास्केनान्यथा निरुक्तिर्दर्शिता यथा । “उलूखलमुत्करं वोकरं वोर्द्ध्वकं वोरु मे कुर्वित्यब्रवीत्तदुलूखलमभयमुत्करं वै तदुलूखलमित्याचक्षते परोक्षेण” । स्वार्थे कन् तत्रार्थे “गृहे गृह उलूखलके” ऋ० १,१२८, ५ । तद्धस्य साधनत्वेनास्त्यस्य ठन् । उलूखलिकः । तत्साधनके जने “दन्तोलूखलिकोऽपि वा” मनुः । २ गुग्गुलौ पु०

**उलूखलसुत** पु० ३त० । उलूखलेनाभिषुते सोमरसे “उलूखलसुतानामवेद्विन्द्रः” ऋ० १,२८,१,२,३ ।

**उलूत** पु० उल—बा० ऊतच् । अजगरसर्पे त्रिका० ।

**उलूपिन्** पु० ओः शम्भोः रूपमस्त्यस्य इनि रस्य लः । शिशुमारे अमरः । पृ० ह्रस्वपाठोऽपि तत्रैव उलपिन् इत्यपि पाठः क्वचित् तत्रार्थे ।

**उलूपी** स्त्री कौरव्यनागकन्याभेदे तत्कथा भा० आ० २४१अ० । “उलूप्युवाच ऐरावतकुले जातः कौरव्यो नाम पन्नगः । तस्याऽस्मि दुहिता राजन्! उलूपी नाम पन्नगी । साऽहं त्वामभिषेकार्थमवतीर्णं समुद्रगाम् । दृष्ट्वैव पुरुषव्याघ्र! कन्दर्पेणाभिमूर्च्छिता । तां मामनङ्गग्लपितां त्वत्कृते कुरुनन्दन! । अनन्यां नन्दयस्वाद्य प्रदानेनात्मनोऽनघ! । अर्जुन उवाच । ब्रह्मचर्य्यमिदं भद्रे! मम द्वादशवार्षिकम् । धर्म्मराजेन चादिष्टं नाहमस्मि स्वयंवशः । तव चापि प्रियं कर्त्तुमिच्छामि जलचारिणि! । अनृतं नोक्तपूर्वञ्च मया किञ्चन कर्हिचित् । कथञ्च नानृतं मे स्यात्तव परिप्रियं भवेत् । न च पीड्येत मे धर्म्मस्तथा कुर्य्यां भुजङ्गमि! । उलूप्युवाच । जानाम्यहं पाण्डवेय! यथा चरसि मेदिनीम् । यथा च ते ब्रह्मचर्य्यमिदमादिष्टवान् गुरुः । परस्परं वर्त्तमानान् द्रुपदस्यात्मजां प्रति । यो नोऽनुप्रविशेन्मोहात्स वै द्वादशवार्षिकम् । वने चरेद्ब्रह्मचर्य्यमिति वः समयः कृतः । तदिदं द्रौपदीहेतोरन्योऽन्यस्य प्रवासनम् । कृतवांस्तत्र धर्म्मार्थमत्र धर्मो न दुष्यति । परित्राणञ्च कर्त्तव्यमार्त्तानां पृथुलोचन! । कृत्वा मम परित्राणं तव धर्म्मो न लुप्यते । यदि वाऽप्यस्य धर्म्मस्य सूक्ष्मोऽपि स्याद्व्यतिक्रमः । स च ते धर्म्म एव स्याद्दत्त्वा प्राणान्ममार्जुन! । भक्ताञ्च भज मां पार्थ! सतामेतन्मतं प्रभो! । न करिष्यसि चेदेवं मृतां मामुपधारय । प्राणदानान्महाबाहो! चर धर्म्ममनुत्तमम् । शरणञ्च प्रपन्नाऽस्मि त्वामद्य पुरुषोत्तम । दीनाननाथान् कौन्तेय! परिरक्षसि नित्यशः । साऽहं शरणमभ्यैमि रोरवीमि च दुःखिता । याचे त्वां चाभिकामाऽहं तस्मात्कुरु मम प्रियम् । स त्वमात्मप्रदानेन सकामां कर्त्तुमर्हसि । वैशम्पायन उवाच । एवमुक्तस्तु कौन्तेयः पन्नगेश्वरकन्यया । कृतवांस्तत्तथा सर्व्वं धर्ममुद्दिश्य कारणम् । स नागभवने रात्रिं तामुषित्वा प्रतापवान् । उदितेऽभ्युत्थितः सूर्य्ये कौरव्यस्य निवेशनात् । आगतस्तु पुनस्तत्र गङ्गाद्वारं तया सह । परित्यज्य गता साध्वी उलूपी निजमन्दिरम् । दत्त्वा वरमजेयत्वं जले सर्व्वत्र भारत! । साध्या जलचराः सर्व्वे भविष्यन्ति न संशयः” ।

**उल्का** स्त्री उष-दाहे क नि० षस्य लः । रेखाकारे गगनात् पतत्तेजःपुञ्जे । अग्न्युत्पातशब्दे ६२पृष्ठे तत्स्वरूपफलादिकमुक्तम् । “बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः” मेघ० । “उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च” । “उल्कापाते दिशां दाहे गोमायुविरुते तथा” “विद्युत्स्तनितवर्षेषु महोल्कानां च संप्लवे” मनुः । “स्फुर-